✧˖°*❋ ❋*°˖✧

# गणेश अष्टकम्

# Ganesh Ashtakam

✧˖°*❋ ❋*°˖✧

# गणेश अष्टकम्

सर्वे उचुः ।
यतोऽनंतशक्तेरनंताश्च जीवा
यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥ 1 ॥

यतश्चाविरासीज्जगत्सर्वमेत-
-त्तथाब्जासनो विश्वगो विश्वगोप्ता ।
तथेंद्रादयो देवसंघा मनुष्याः
सदा तं गणेशं नमामो भजामः ॥ 2 ॥

यतो वह्निभानू भवो भूर्जलं च
यतः सागराश्चंद्रमा व्योम वायुः ।
यतः स्थावरा जंगमा वृक्षसंघाः
सदा तं गणेशं नमामो भजामः ॥ 3 ॥

यतो दानवाः किन्नरा यक्षसंघा
यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ 4 ॥

यतो बुद्धिरज्ञाननाशो मुमुक्षो-
-र्यतः संपदो भक्तसंतोषदाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः ॥ 5 ॥

यतः पुत्रसंपद्यतो वांछितार्थो
यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ।
यतः शोकमोहौ यतः काम एव
सदा तं गणेशं नमामो भजामः ॥ 6 ॥

यतोऽनंतशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना
सदा तं गणेशं नमामो भजामः ॥ 7 ॥

यतो वेदवाचो विकुंठा मनोभिः
सदा नेति नेतीति यत्ता गृणंति ।
परब्रह्मरूपं चिदानंदभूतं
सदा तं गणेशं नमामो भजामः ॥ 8 ॥

श्रीगणेश उवाच ।
पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः ।
त्रिसंध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥ 9 ॥

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥ 10 ॥

यः पठेन्मासमात्रं तु दशवारं दिने दिने ।
स मोचयेद्बंधगतं राजवध्यं न संशयः ॥ 11 ॥

विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वांछितॉंल्लभते सर्वानेकविंशतिवारतः ॥ 12 ॥

यो जपेत्परया भक्त्या गजाननपरो नरः ।
एवमुक्त्वा ततो देवश्चांतर्धानं गतः प्रभुः ॥ 13 ॥

**इति श्रीगणेशपुराणे उपासनाखंडे श्रीगणेशाष्टकम् ।**

✧˳·˖✶ ✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net